Bhairo Pathak

Beeja Kosh

बीज कोष

Sanskrit

Paper – Printed


1941 Sambat (134 years old)

19 folio (Folio No. 1 & 2 missing)

11.5" x 5"

Incomplete

ह्रीं ४२ एतासां मूलमंत्रेण योजितो कारक्षरेणाच ब्रह्मादिदेवतैः पूज्या श्री विद्या षोडशाक्षरी ततो लक्ष्मीमंत्रोद्धारः
उक्तं च रुद्रयामले· हरिणाक्षीपरान्मस्तं लक्ष्म्या बीजत्रयं स्मृतं ४४ विपरीततया जाप्यं सत्वरं फलदायकं क्षमाशं कापि
नीरत्नुवांते प्रोक्तं शिष्यो नम ४५ ॐ ततः स्वाहाबीजानि उक्तं चोड्डामरे आपोवतं तथा नीरं उद्रूयं च पयस्तथा ४६ जल
बीजानि प्रोक्तानि षड्सत्यान्यनानि च प्रकाशं ॐ ह्रीं श्रीं लक्ष्मि महालक्ष्मि सर्वकामप्रदे सर्वसौभाग्यदायिनि अभिमतंप्र
यच्छ सर्व सर्वगते सुरूपे सर्वदुर्जय विमोचनि ह्रींसः स्वाहा इति मूलं ततः सरस्वतीमंत्रोद्धारः उक्तं च शारदापटले तारं लज्जा
वाग्भवं च परा प्रणवमेव च बीजं पंचशिरोक्तं यमंते ज्ञेयानम इति अथ नमो बीजानि उक्तं चागमालंकरणे नमो विश्वस
ध्यास्तमं चौशमूकं चास्मृतिनथा ४९ अन्यानि कृतिमान्येवं सुरासुरनमस्कृते प्रकाशम् ॐ ह्रीं ऐं ह्रीं सरस्वत्यै नमः ततस्त्राण मंत्रो
द्धारः उक्तं च भैरवसर्वस्वे तारं व्योषं तथा कांता माया वाग्भवमेव च ५१ कूर्चं चैव महेशानि ह्यंते फट्द्वयं तथा ततो ह्रां बीजोद्धा
राणि उक्तं चाराम सिंधौ· स्कंदं व्योषं बडिवं च संपूज्य हरमित्यतः ह्रां बीजोद्धारमेतद्धि वान्यदन्नतकं वदेत् ५३ ततः स्त्रीं बीजो
द्धाराणि वामकेश्वरे कांता च कमलाक्षी च प्रियापि परमापि च लंबापि ललना जाला कृत्रिमाण्यपराणि च ५५ ततः कूर्चबी
जोद्धाराणि· छिन्नारहस्ये· कूर्चं कूलं नटं नीरं वा सत्याण्यपराणि च ततः फट्बीजानि अस्मिन्नेव फट् हरं तुरंगवान्यसत्य



बी॰को॰ तुसुरेश्वरि॰ प्रकाशं ॐ ह्रां स्त्रीं ह्रीं ऐं हूं उग्रतारे फट् स्वाहा ततो भुवनेश्वरी मंत्रोद्धारः उक्तं च कुब्जिकासर्वस्वे॰ प्रणवं च तथा
३ मायाकमला मन्मथस्तथा ५८ अंते विश्वं महेशानि नाममध्ये सुरेश्वरि प्रोक्तायं भुवनेश्वर्य्या मनुश्चैकादशाक्षरः ५९ प्र
थमं तु बीजानि उक्तं च त्रिपुरादीकायां: मंत्रो मनुर्हरश्चैव हनुर्वीतं विदुर्बुधाः ६० बीजान्येतानि मंत्रस्य कृत्रिमाण्यपरा
णि च प्रकाशं ॐ ह्रीं श्रीं क्लीं भुवनेश्वर्यै नमः ततो मातंगीमंत्रोद्धारः उक्तं च कुलसिद्धसंताने तोमा कालीं तथा लक्ष्मीबीजगु
रुद्वयमेव च ६१ वाग्भवं रसबीजानि चादौ प्रोक्तानि शंभुना अंते जिह्वा तथा पद्मं लज्जा नीरजमेव च ६२ वासना पंकजं
चैव वनं प्रोक्तं च शूलिना अथ कालीबीजानि कुलचूडामणौ कालीकं नीरसंज्ञापि जिह्वापि रसना तथा ६४ क्लीं बीजानि
तथैतानि कृत्रिमाण्यपराणि च अथ बागुराबीजोद्धाराणि बागुरा वायुपूज्यापि वानदापि त्रिबीजकं ६५ श्रीं बीजानि शिवेत्री
णि कृत्रिमाण्यपराणि च अथ वारुकबीजानि मुंडमालातंत्रे चारुकं चैकवर्गीया चारुतो वृक्षनबीजकं ६६ चतुष्टयं च क्ष्री
बीजमस्त्यन्यपराणि च ततः पद्मबीजोद्धाराणि यामकेश्वरे पद्मः पंकजं पद्मयोनी नीरजं चाम्बुजं तथा ६७ पंचडक्कार
बीजानि कृत्रिमाण्यपराणि च प्रकाशम् ॐ ऐं श्रीं ग्रीं क्रीं उच्छिष्टचांडालिनि देवि महापिशाचिनि मातंगिनि देवि क्रौं ठः राम:
ह्रीं ठः ऐं स्वाहा इति मातंगीमूलम् अथ धारिकामंत्रोद्धारः उक्तं च॰ स्वच्छन्दे त्रिपुराशिरोमणौ तारं माया श्रियं कूर्चं सिंधुरं ३

शून्यमेवच ६९ कल्मानंशारिकादेव्यावीजंसप्ताक्षरंस्मृतं अंतेस्तंभंचविज्ञेयंशारिकामूलमुत्तमं ७० ततःसिंधुरवीजो
द्धाराणि उक्तंचवामकेश्वरे० सिंधुरंचगजंघोणाहस्तचद्विरदंतथा मुवीजानिचचत्वारिकृत्रिमाण्यपराणिच ततःआकाश
वीजोद्धारः उक्तंचभैरवतंत्रे शून्यंसभावरंमामब्धांवीजंचचतुष्टयम् ७२ हकारंचैवविज्ञेयमित्युक्तंरुद्रयामले अस
त्यमपरंज्ञेयंताराभक्तिसमन्वितं ततःकल्याणवीजानि अस्मिन्नेव कल्याणंचैवशर्मापिशंभुभंचचतुष्टयम् अनृतं
चापरंज्ञेयंपूर्वेनेश्वरनंदिनि शर्मवीजोसौः शंच प्रकाशं ॐ ह्रीं श्रीं ह्रूं प्रुं श्रों शं शारिकायै नमः इति मूलम् अथराज्ञीमं
त्रोद्धारः तारंलक्ष्मींश्रियंचाग्निः कामंशक्तिःषडक्षरः वीजंचषड्विरोज्ञेयंततःपल्लवमुद्धरेत् ७६ भगवत्यैनतोराज्ञ्यैचं
तेमायाचठद्वयं एभिःसहमनुःप्रोक्तोमंत्रःपंचदशाक्षरः ७७ ततोऽग्निवीजानि अग्नीरेफश्चवन्हीश्चहुतभुक्हव्यवा
हनः रंवीजोद्धारमेतत्तुकृत्रिमंचापरंस्मृतं ७८ प्रकाशं ॐ ह्रीं श्रीं रं क्लीं सौः भगवत्यै राज्ञ्यै ह्रीं स्वाहा इति मूलम् इतिश्या
मातंत्रे अथभीडामंत्रोद्धारः उक्तंचकूलचूडामणौ प्रणवंचविधूतिश्चहरिकांतातथैवच विपच्छत्याग्निवीजानिसं
योज्यवाग्भवंततः ८० मदनंचतथाशक्तिवीजंसप्ताक्षरंलिखेत् ठद्वयेनसमायुक्तः प्रोक्तोविंशाक्षरोमनुः ८१ प्रकाशः
ॐ ह्रीं श्रीं ह्लां ऐं क्लीं सौः भीडाभगवतीहंसरूपिणिस्वाहा इतिमूलं अथज्वालामुखीमंत्रोद्धारः शारदाटीकायांतारंल

ज्वालाख्यियैचैवमनेकूर्चेहरंपमः वीजंचभक्षांदे आज्वालामुख्याः सुरेश्वरी ८३ प्रकाशं ॐ ह्रींश्रींज्वालामुखिममसर्वशत्रू
न्भक्षयभक्षयहूंफट्स्वाहा इतिमूलं दक्षिणामूर्तिः दशविद्यामयाप्रोक्तायथागमविनिश्चिता ८५ साधकेष्टप्रदादे
व्यो नानारत्नविभूषिताः एतासांदशविद्यानांगुणान्वक्ष्यामितत्वतः ८६ दक्षिणामूर्तिः मुक्तिंददातित्रिपुरालक्ष्मीलक्ष्मी
र्ददातिच विद्यांददातिवाग्देवीजन्मजन्मांतरेष्वपि ८७ मातंगीभूतपक्षादिभीतिंहरतिसर्वतः शारिकाशंददात्येवराज्ञो
राज्यंप्रयच्छति ८८ ददातिसंततिंभीडाधनंज्वालामुखीतथा दशविद्याःसदाभक्त्याभक्तेभ्योवरमीप्सितं ८९ प्रयच्छं
तिमहादेविपूजाहोमजपादिभिः इतिश्रीदक्षिणामूर्तिमुनिविरचितेउद्धारकोशतंत्रेदशविद्यामंत्रोद्धारकोशंगुणाख्या
नंनामप्रथमःकल्पः १ ईश्वरउवाच शृणुदेविप्रवक्ष्यामित्रिपुरांपरिवारितांषट्सखीभिरहंतासांमंत्रोद्धारंब्रवीमिते
१ अक्षोभ्यः गुरोविद्यात्रिसंभूतानानाशास्त्रविचक्षण श्रोतुमिच्छाम्यहंसर्वान्मंत्रांश्चब्रह्मसिद्धये २ दक्षिणामूर्तिः शृणु
क्षोभ्यमहाभागसर्वंवक्ष्यामितत्वतः दशविद्याभद्रकालीतुरीयाछिन्नमस्तिका ३ दक्षिणाकालिकाश्यामाकालरात्रि
पिसुंदरि षट्सखीनामहंतासांमंत्रोद्धारान्ब्रवीमिते ४ तंत्रादौभद्रकालीमंत्रोद्धारःउक्तंचश्यामातंत्रे कालीत्रयंकूर्चं
युग्मंलज्जायुग्मंचभद्रिके ५ भद्रकालिपदंब्रूयाह्रींजानिप्रतिलोमतः ठद्वयेनसमायुक्तोभद्रकालीमहामनुः ६ अ

यच्चंडिकाबीजानि मुंडमालातंत्रे भद्रिकाभास्वतीभीमाभैंबीजत्रयमीरितम् ७ असत्यमपरंज्ञेयंब्रह्मविशेकदीपकं प्र
काशम् क्रींक्रींक्रींहूंहूंह्रींह्रींभैंभद्रकालिभैंह्रींह्रींहूंहूं क्रींक्रींक्रींस्वाहा इतिमूलम् अथतुरीमंत्रोद्धारः स्वतंत्रे प्रणवंतारका
ज्योतिःताराह्यंतेनमइतितुर्यामूलमिदंप्रोक्तंस्वतंत्रेशंभुनास्मृतम् ९ अथतारकादिबीजोद्धारः कामेश्वरतंत्रे त्र्यक्ष्यंभंतार
काज्योतिःताराबीजानिपंचच प्रकाशं ॐ त्रींत्रींत्रींमहातुर्यैनमः १० इतिमूलम् अथछिन्नामंत्रोद्धारः छिन्नाशिरोमणौ
त्र्यंबकःसकलापद्माचारुकंचसुरेश्वरि तंत्रेउच्छूनबीजंचफट्द्वयेनसमायुतं ११ प्रकाशं ॐ ह्रींश्रींछिन्नमस्तिके
फट्स्वाहा अथदक्षिणाकालीमंत्रोद्धारः उक्तंचश्यामारहस्ये कंनीत्रयंनीरयुग्मस्समायुग्मनतोभिधं १३ दक्षिणेका
लिकेत्येवंचांते कालीत्रयंपुनः कूलयुग्मपराणुग्मपयश्चैवसुरेश्वरि १४ दक्षिणाकालिकायाश्च हनुर्ह्रींविंशदक्षरः प्रका
शं क्रींक्रींक्रींहूंहूंह्रींह्रींदक्षिणेकालिके क्रींक्रींहूंहूंह्रींह्रींस्वाहा इतिमूलम् अथश्यामामंत्रोद्धारः श्यामातंत्रे हरिणा
क्षीनततोलज्जाकालीजिह्वाचतुष्टयं १६ ततःसुधारसेश्यामेकृष्णशापंविमोचय अमृतंस्रावयस्वाहाश्यामातंत्रमुदाहृ
तम् १७ प्रकाशम् श्रीह्रींक्रांक्रींक्रैंक्रौंकः सुधारसेश्यामेकृष्णशापंविमोचयामृतंस्रावयस्वाहा इतिमूलम् अथका
लरात्रीमंत्रोद्धारः कालरात्रीकल्पे प्रणवंवासनामायामन्मथःकमलोद्भवमितिद्दोषः १९ मन्मथःकमलातया बी

श्री·को· जंपंचशिरोज्ञेयंततःपल्लवमुद्रेन ततोमध्येभिधंत्यक्काततःसर्ववशंकुरु २० कुरुनीरंदेहियुग्मंमध्येत्यक्काभिधंततः
५ गणेभ्यस्थैयैनथाचानेनविश्वेदेविसमास्तयेत् प्रकाशं ॐ ऐं ह्रीं क्लीं श्रीं काहेश्वरिसर्वजनंमनोहरिसर्वमुखस्तंभिनिसर्वराज
वशंकरि सर्वदुष्टनिर्दलिनिसर्वस्त्रीपुरुषाकर्षिणिवंधीश्रृंखलास्त्रोटयत्रोटयसर्वशत्रून्भंजयभंजयद्वेषीन्निर्दल
यनिर्दलयसर्वान्स्तंभयस्तंभयमोहनास्त्रेणद्वेषिणमुच्चाटयउच्चाटयसर्ववशीकुरुकुरुस्वाहा देहिदेहिसर्वकालरात्रि
कामिनिगणेश्वर्यैनमः २४ श्रीभैरवः देवेशि त्रिपुराभालविज्ञेयंद्वादशात्मकं वक्ष्यामिभवतांप्रीत्याशृणुध्वंमुनयोरहः २५
उक्तंचमुंडमालातंत्रे त्रिपुरामंत्रराजंतुविज्ञेयंद्वादशात्मकं केवलंमुक्तयेदेविसर्वदागोपयेत्सदा २६ उक्तंचोड्डामरतंत्रे०
अष्टादशात्मिकाज्ञेयाविद्याश्रीषोडशाक्षरी पंचयंत्रस्थितंदेविसद्योमुक्तिप्रदंस्मृतं २७ उक्तंचत्रिपुराशिरोमणौ अष्टात्मक
मिदंबीजंत्रिपुरायाःस्मृतंमया अष्टभिर्वत्सरैर्देविमासैरष्टभिरेवच २८ अष्टभिर्दिवसैर्वापिजानीयादंगलक्षणं लक्ष्मी
भेदद्वयंज्ञेयंभाषितंकुलिवासरा २९ लक्ष्मीश्चरुक्मिणीश्चैवत्रिभिर्वर्षैःफलंलभेत् ३० अथसरस्वतीभेदानि उक्तंचकामि
नीकल्पे वाग्देवीचतथावाणीसरस्वत्यनलप्रिया ३१ भेदान्येतानिख्यातानिफलंवर्षचतुष्टये ततस्ताराभेदानि उक्तंचाक्ष रामः
केश्वरे तारापिनारिणीचैवएकजटातथैवच ३१ नीलसरस्वतीचैवमुग्रतारामकीर्तिता ताराभेदानिपंचैवमक्षोभ्येणेतिभाषितं ५

३२ अथभुवनेश्वरीभेदानि उक्तंचभैरवतंत्रे भैरवीभीमरूपाचभीमापिभुवनेश्वरी भक्त्याफलप्रदांदेविनित्यंवर्षचतुष्टये ३३
अथमातंगीभेदानि उक्तंचविश्वसारतंत्रे शारिकापितथापर्णाफलदापिद्विवर्षिके ३५ ततोराज्ञीभेदानि राज्ञाभेदद्वयंप्रोक्तं
रूपिणीचस्वर्गगामिनी द्विवर्षमध्येराज्ञीचभक्त्याराज्यंप्रयच्छति ३६ भीडाभेदविहीनाचप्रजाभाग्यविवर्द्धिनी दूनिकलाणि
वे अथज्वालामुखीभेदानि उक्तंचज्वालाशिरोमणौ आदौज्वालामुखीचैवमंविकाभगरूपिणी यथेष्टफलदंप्रोक्तंज्वा
लाभेदत्रयंशिवे ३८ एतासांदशविद्यानांनानाभेदक्रमःस्मृतः ततस्त्रिपुरातिलके त्रिपुराभेदानि त्रिपुराभैरवीविद्याहिं
गुलाचंडिकातथा चामुंडानारसिंहीचचैंद्रीहैमवतीश्वरी ४० मृडानीवारुणीदुर्गामहात्रिपुरसुंदरी देव्याद्वादशभेदानि
प्रोक्तान्येतानिशूलिना ४१ प्रकाशा श्रीह्रींसौः त्रिपुरीचवर्मवसनंकामःशरङ्करवि ॐह्रींश्रीनारसिंहीतथाचैंद्रिवारुणीमेव
ह्रींचमदनःकामंपरस्तक्रिनीदेवीहैमवतीश्वरीचकमलालज्जातथामन्मथ चंद्रोवारुणिवाकुइद्भलपरादुर्गेस्मृताशंभु
ना श्रीह्रींक्लींवरुणशरदपितथात्र्यसंपरारुक्मिणी विद्याश्रीविपरीतभावसहिताः श्रीषोडशात्माविधिः ४४ इतिषोडशा
क्षरीभेदानि श्रीदेव्युवाच महेश्वरत्रिकालज्ञशरणागतवत्सल भेदैरेतानांदेवीनांमनूंस्त्वंवक्तुमर्हसि ४५ ईश्वरउवाच
रयपानवदेवेशिनद्वस्यामिसमासतःयदुक्तंभैरवतंत्रे अथश्रियःॐह्रींश्रींहरिणास्यावीजहृयंफलदंसद्यः त्रांसंह्रीं ६

बी॰को॰

शक्तिनीरमंते प्रोक्तमपिधूर्यदिना ४७ अथरुक्मिण्याः ॐ ह्रीं चैवं तु रुक्मिण्यास्तारं लक्ष्मीमयस्तथा अनेन प्रोक्तं महेशानी

९

लक्ष्म्याः भेदद्वयं स्मृतं ४८ प्रकाशं ॐ ह्रीं श्रीं लक्ष्मि ह्रीं सः स्वाहा ॐ ह्रीं रुक्मिणी ॐ श्रीं स्वाहा · अथ सरस्वतीभेदानि नाम
पराबाग्भवमेवस्यामानारं च लक्ष्मीः परमेश्वरेण वाग्देवतायाः फलदं हि बालनूनं नमो भक्तिपरायणानां ४९ अथ वाण्याः
तारं लज्जा ऐं बीजं वह्निते स्तम्भमुदाहृतम् ॐ ह्रीं ऐं वाण्यै नमः इति मूलं चार्वंगपिविभूमिश्च त्र्यक्षं सरस्वत्यै ततः ५० नमोऽ
नेपरमेशानी भयाप्रोक्तं नगात्मजे अथानलप्रियामूलं तारं लज्जा वाग्भवं च मध्येऽनलप्रियेततः त्र्यक्षविम्बं तथा यानपक्षे
श्वरं नंदिनि ५१ देमाश्चत्वारि भेदानि सरस्वत्या वरानने अथ ताराभेदानि प्रकाशम् · ॐ ऐं हूं तारे फट् स्वाहा ॐ स्त्रीं ऐं हुं ए
कजटे फट् स्वाहा ॐ ह्रीं ऐं हूं नीलसरस्वती फट् स्वाहा ॐ ह्रीं स्त्रीं ह्रीं ऐं हुं उग्रतारे फट् स्वाहा इति ताराभेदानि · अथ भुवनेश्वरीभेदाः
ॐ भैरव्यै नमः ॐ ह्रीं भीमरूपायै नमः ॐ श्रीं भीमायै नमः इति मूलं · ॐ ह्रीं श्रीं क्लीं भुवनेश्वर्यै नमः अथ मातंगीभेदानि चक्रि
ण्याः ॐ क्रों क्रीं महाचक्रिणी ऐं ठः स्वाहा ततः कुब्जिकायाः ॐ श्रीं प्रों कुब्जिके देवि ह्रीं ठः स्वाहा अथ शांभरीमंत्रः ॐ श्रीं रौं शा
शांभरि क्रौं ठः स्वाहा इति मूलं · अथ शारिकामंत्रः ॐ ह्रं सु आं शें ईं ये अपर्णायै नमः अथ हैमवतीश्वरीमूलं · ॐ ह्रीं श्रीं है राम:
मवतीश्वरि ह्रीं स्वाहा अथ भीडाभेदविहीनेत्यलम् अथाम्बिकामूलं ॐ ह्रीं ॐ ह्रीं मातरंबिके हुं फट् स्वाहा इति मूलं एवं ९

कादेव्याकानिनामानिकीदृशामनवस्तथा श्रोतुमिच्छामहेत्वत्तोवक्तुमर्हसिनःप्रभो ८ दक्षिणामूर्तिः शृणुध्वमृ
षयःसम्यक्सर्वागमरहस्यकं ९ येनश्रवणमात्रेणहयमेधफलंलभेत् ईश्वरउवाच मुनीश्वरानमन्नूनदेवोदक्षि
णामूर्तिरब्रवीत् १० सप्तविद्यापुराप्रोक्तावज्रयोगिन्यादिदेवताः तासांनामानिवक्ष्यामिपर्वतेश्वरनंदिनि ११ दक्षिणा
मूर्तिनादेविप्रकाशितानितान्वतः श्रीवज्रयोगिनीदेवीवाराहीशारदातथा कामेश्वरीतथागौरीह्यन्नपूर्णातथैवच
१२ कुलवागीश्वरीचैताःसप्तदेव्यःशुभाभयाः दक्षिणामूर्तिनातेषांसप्तदेव्याःप्रकीर्तिताः १३ एतासांबलमाश्रित्य
देवीत्रिपुरसुंदरि सृजेज्जगदेतच्चपालनेपिसुरेश्वरि हरतेपितथाविश्वंचराचरसमन्वितं ऋषिः एतद्वाक्यामृतं
तस्यामुखांभोजाच्छ्रुतंमया १५ तासांमंत्रंप्रवक्ष्यामिशृणुध्वंमुनिपुंगवाः अथमंत्रोद्धारः उक्तंचस्वतन्त्रे प्रणवंसकला
चैवबीजौहूंफट्द्वयकौ मध्येपिवज्रयोगिन्यैहांतेनोरमुदाहृतम् १६ प्रकाशं ॐ ह्रींवज्रयोगिन्यैस्वाहा अथवा
राहीमंत्रोद्धारः उक्तंचत्रिपुरातिलके वासनांचैववाह्रीकंतमोबीजसमन्वितम् वाग्भवंचोश्मकंचैवततःपल्लवमुद्धरे
त् १७ ठगवतिचवातोलितत्तोवाराहिदेवते वाराहिमुखेचैवंवासनाचमठंतथा १८ ततःपंकजपयोजोहरंनीरमहेश्वरि

वाराहिभगवत्याश्चह्यष्टविंशाक्षरोमनुः १९ अथवाह्रूंकबीजोद्धाराणि २० मुंडमालातन्त्रे वाह्रीकंमवसंज्ञंवह्निगुवी

तिभेदमंत्राणि महाप्रोक्तानि पार्वति एतासां दशविद्यानां अन्यासां शृणु वच्म्यहं ५७ भद्रकाली यथा देवी दक्षिणा
कालिका तथा तुरीचेता मया ख्याता भेदहीना महेश्वरी ५८ अथ छिन्नमस्तका द्विधा ॐ ह्रीं श्रीं छिन्नमस्तिके क्लीं फट्
स्वाहा द्वितीयो यथा श्रीं ह्रीं ह्रूं ऐं वज्रवैरोचनि ह्रीं फट् स्वाहा इति मूलम् दक्षिणा कालिका श्यामा कालरात्री त्रिसुंदरि ५९
एता भेदविहीनाश्च यथाकामफलप्रदाः इति दक्षिणामूर्तिमुनिविरचिते उद्धारकोशतंत्रे सर्वागमसारे दशविद्याषड्भेदे
मंत्रोद्धारकोशभेदे देवीमंत्रोद्धारस्तबको नाम द्वितीयः कल्पः २ भैरवः ततो देवि प्रवक्ष्यामि देवीनां मंत्रमुत्तमं शृणुष्व
कमना भूत्वा येन सिद्धिर्भवेद्ध्रुवम् १ दक्षिणामूर्त्तिना तस्मिन्कालेनेवासिनेन तदा यत्सूचितं महादेवि तद्वक्ष्यामि समासतः २
तस्मिन्काले मुनेस्तस्य मुनिसेवितमाश्रमं आययुर्मुनयस्सर्वे मन्त्रिणश्च समुत्सुकाः ३ लोहितोद्दालकौशांबमातंगौ पुं
डरीकजौ शाण्डिल्यगालवौ वेनस्तस्याश्रमपदं ययुः ४ सर्वे मिलित्वा मुनिपुंगवं ते श्रीदक्षिणामूर्त्तिमिदं समूचुः स्व
कीयदेवेष्टमनून्सगूढान्पप्रच्छुरादौ परमेशमूलं ५ दक्षिणामूर्त्तिरुवाच शृणुध्वं मुनयः सर्वे वक्ष्याम्याश्चर्यमुत्त
मं चराचरेस्मिन्जगति देविसीमंतशेश्वरा ननाहं शोक्तं चित्राक्ता यथा त्रिपुरसुंदरी ६ तस्या मुखाम्बुजात्सद्देव्या
विद्या मया श्रुताः यथेष्टफलदा भक्त्या सर्वरोगभयापहाः ७ अचिरेणैव कालेन फलदास्साध्यमंत्रिणां ऋक्षयजुः १

बी॰को॰ उक्तंचत्रिपुराशिरोमणौ प्रणवंकमलाचैवमायावाल्हीकमेवच शिववीजंतथादेविगौरीसर्वेश्वठद्वयम् २९ भगव
८ त्यामहागौर्यावालः श्रीषोडशाक्षरी अथशिववीजोद्धारः कूलचूडामणौ· शिववीजंच शंभुश्चसर्वःशंकरएवचगंवी
जानिचचत्वारिकृत्रिमाण्यपराणिच ३० ॐ ह्रीं श्रीं ह्रीं ग्लौं गं गौरि गीं स्वाहा इतिमूलं अथान्नपूर्णामंत्रः उक्तंचकामेश्वर
तंत्रे तारंपरापिकमलामीनकेतनएवच विश्वंततोभगवतिमाहेश्वरितततःपुनः ३१ अन्नपूर्णेठद्वयंचमनुर्विंशाक्षरः
स्मृतः मीनकेतनइतिद्रांयाः उक्तंचत्रिपुरसुंदरीसर्वस्वे अक्षंमायापिपद्मंचकामंविश्वमुदाहृतम् वीजंतुषट्क्षरोक्तेयं
ततः पल्लवमुद्धरेत् विश्वेनसहदेवेशीमूलशीर्षष्डक्षरः प्रकाशं ॐ ह्रीं श्रीं क्लीं नमोभगवतीमाहेश्वरिअन्नपूर्णेस्वाहा
अथकुलवागीश्वरीमंत्रोद्धारः उक्तंचमुंडमालातंत्रे प्रणवंमदनंचैवस्कंदंनारायणप्रिया ३२ जटमिच्छान्तरंचैवततः
पल्लवमुद्धरेत् उषहलेततःपश्चात्कुलवागीश्वर्येवच ३३ अंनेचवासनावीजंपद्मंकास्यिनीरजम् नर्त्तकीवीजमंभो
जंपयःचैवसुरेश्वरि ३४ कुलवागीश्वरीदेव्याःतुर्यविंशाक्षरोमनुः अथेच्छावीजोद्धारः वामकेश्वरे· इच्छावीजंस्वहा
कांक्षालिप्सावीजचतुष्टयम् ऊंवीजान्येवमेतानिकृत्रिमाण्यपराणिच ३५ अथनर्त्तकीवीजोद्धाराणि छिन्नारहस्ये एमः
नर्त्तकीवीजमतुर्यंवेश्यापिगणिकातथा ३६ पण्यस्त्रीवीजानिपंचरश्रीवीजस्मान्तंतपरं अंबुजांभोजयोरैक्यमितिन ८

जंसुरेश्वरि श्रैंनौंवीजोद्धारमेतद्धि चान्यदनूतमीरितं २१ अथतमोवीजोद्धारः स्वतंत्रेनमोवीजं तथाध्वांतमोहंतिमिश्रमेव
च लंवीजोद्धारमेतद्धि कृत्रिमंचान्यदीश्वरि २२ प्रकाशं ऐंग्लौंलंएंनमोभगवति वार्तालि वाराहि देवते वराहमुखि ऐंग्लौं
ठः ठः स्वाहा· इतिवाराहीमूलम् अथशारदामंत्रोद्धारः शारदापटले तारंमायाचमदनंशरद्धृज्ञेयमौष्मकं मंत्रंचष
ड्विद्धिरोज्ञेयंततः पल्लवमुद्धरेत् २३ भगवत्यैशारदायैचातेलज्जाचठद्वयम् इत्युद्धारः प्रकाशम् ॐ ह्रींक्लिंसः नमोभग
वत्यैशारदायैह्रींस्वाहा इतिशारदामूलं अथकामेश्वरीमंत्रोद्धारः मायांचहरिणाक्षींचचंद्रः शीतांशुरेवच मदनश्चाग्नि
ध्वांतोहृौसंयोज्यस्तनवीजकम् २४ मनुः सप्तशिरोज्ञेयस्ततः पल्लवमुद्धरेत् जंवनाख्येनतोदेविकामेश्वरितथैवच २५
ततोवाणदेवतेपिचांतेनीरमुदाहृतम् कामेश्वर्यामहादेव्याह्या विंशत्यक्षरोमनुः चंद्रस्यवीजोह्यैऐन्द्रा अथचंद्रवी
जोद्धारः उक्तश्चकालीसर्वस्वे· चंद्रः शीतांशुरिंदुश्चशवरीपतिरेवच २६ ताराधिपः सुधारश्मिः कृत्रिमाण्यपराणिच
अथोर्मिवीजोद्धारः अस्मिंस्तन्त्रे उर्मिर्वीचिस्तथाचैवतरंगस्त्रितयंतथा २७ वंवीजोद्धारमेतद्धि परंवीजंतुकृत्रिमं अथ
स्तनवीजोद्धारः सुगमालंकरणे स्तनवीजंकुचंचैवमुरोजंहृज्जमेवच २८ जंवीजान्येवमेतानिकृत्रिमाण्यपराणिच
प्रकाशं ह्रींश्रींद्रांद्रींक्लींब्लुंजंजंवनाख्यकामेश्वरिवाणदेवतेस्वाहा इतिमूलं इतिभैरवपटले अथगौरीमंत्रोद्धारः



द्रोषः प्रकाशं ॐ क्लीं ह्रीं श्रीं हूं ॐ उषहस्ले कुलवागीश्वरी ऐं ठः ॐ ठः र ब्लौं ठः स्वाहा इति मूलं एतन्मया महेशानि सप्तवि
द्याः प्रकीर्तिताः अद्याहं तव भक्त्यास्तु हृदिय द्रोचते नव ३७ वद मे सत्वरं देवि तद्दक्ष्यामि समासतः देव्युवाच सप्तानां
बालकानां च कीदृशास्ते मनूमताः कृपयाद्य महादेव त्वत्तः श्रोतुं समुत्सहे ३८ मुनयः ब्रह्मर्षे सर्वशास्त्रज्ञ त्वत्तः सर्वे
श्रुतं प्रभो मनून्सप्तकुमाराणां अस्माकं वक्तुमर्हसि ३९ दक्षिणामूर्तिः शृणुध्वं मुनयः सम्यग्यत्पुराकृतिवाससा शिवायै
कथितं प्रीत्या तद्दक्ष्यामि सविस्तरम् ४० ईश्वर उवाच गणेशो वटुकश्चैव स्कंदो मृत्युंजयस्तथा कार्तवीर्यो युनीन्द्रेवंतु
श्रीवो हनुमांस्तथा ४१ रुद्रयामले तंत्रेस्मिन् भाषिताः सप्तबालकाः अथादौ गणेशमंत्रः उक्तं च रुद्रयामले प्रण
वं कमलां लज्जां कंदर्पं मठबीजकं शंकरं षट्छिरो मंत्रं ततः पल्लवमुद्धरेत् ४२ गणपतये ततः पश्चाद्वरवरदमेव च सर्व
जनं ततः पश्चान्मे वशमानय पतिचेअंते पिठद्वयं सेयमष्टविंशाक्षरो मनुः ४३ प्रकाशं ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये
वरवरद सर्वजनं मे वशमानय स्वाहा इति मूलं अथ कुमारमंत्रः कुमारचूडामणौ प्रणवं छविबीजं च मंत्रं तु हृच्छिरः
स्मृतः ४४ मध्ये कुमाराय नमो ह्यतंनीरसमुदाहृतम् अथ छविबीजोद्धारः सिद्धसारस्वते छविबीजं कानि बीजं श्रो
मापि सुषमास्तथा ४५ ह्रां बीजानि च चत्वारि हृत्रिमाण्यपराणि च प्रकाशं ॐ ह्रीं कुमाराय नमः स्वाहा इति मूलं

अथ कार्त्तवीर्यार्जुनमंत्रः उड्डामरतंत्रे प्रणवं वायुपूर्ज्यापि चरुकं मन्मथस्तथा शुक्रो बीजं तथा भूलं कमलां रसनं

तथा ४६ चंद्रं डिंवचकूलाचतुरंगं चसुरेश्वरि मध्ये तन्नाम विज्ञेयं कार्तवीर्यार्जुनायच अंते पयोमनुः प्रोक्त एकविंशाक्ष
रः शिवे अथ शुक्रवीजोद्धारः छिन्नाशिरोमणौ शुक्रवीजं तथा काव्यो भार्गवः कविवीजकम् दैत्यामात्यो महेशानि सुर
सुरनमस्कृते ४७ ब्रां बीजानि तु पंचैव हृत्क्रिमाण्यपराणि च प्रकाशं ॐ प्रैं ब्लीं क्लीं ब्रां आं श्रीं क्रौं ऐं ह्रौं हूं फट् कार्तवीर्यार्जुना
यस्वाहा इति मूलम् शुक्रवीजो ह्रौ ब्रां लीं अथ हनुमन्मंत्रोद्धारः उक्तं च कुलचूडामणौ प्रणवं मूर्द्ध वीजं च विभूतिस्तदनन्तरं
४८ हनुमतेनतः पश्चाद्रामदूताय वै नमः लंकाविध्वंसनायैव अंजनीगर्भसंतमः ४९ भूताय शाकिनीचैव डाकिनीतद
नन्तरं विध्वंसनाय किलिकिलिबुबुकारेण वै पुनः विभीषणाय हनुमद्देवाय तदनन्तरं ऋक्षभार्याहरणीक्षींग्रोघस्कंदं नैव
वच ५१ हरमावस्तथान्तोपसप्तषष्ट्यक्षरो मनुः प्रकाशं ॐ ऐं ह्रौं हनुमते रामदूताय लंकाविध्वंसनायांजनीगर्भसंभूता
यशाकिनीडाकिनीविध्वंसनाय किलिकिलिबुबुकारेण विभीषणाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा इति मूलं
अथ भैरवमंत्रोद्धारः उक्तं च रुद्रयामले प्रणवं मन्मथं चैव मभ्रवीजसमन्वितम् ५२ अधिवीजं कलावीजं शतग्रीवो
जसंयुतम् मायां मध्ये वटुकभैरवायास्मरेत्तथा अंतेयो भैरवस्यायं मनुरष्टादशाक्षरः अथाभ्रवीजोद्धारः वामकर्णे

अथवीजंचजीमूतमंडभद्रवलंघनं विंबीजानिचपंचैवकृत्रिमाण्यपराणिच ५३ अथाग्निवीजोद्धारः त्रिपुरातिलके अ
ग्निवीजंतथासिंधुःसंभवसागरस्तथा हंवीजानिचचत्वारिकृत्रिमाण्यपराणिच ५४ हकारकारयोभेदःअग्निवीजंर
अग्निवीजंरं अग्न्यध्येयोरंतरादंतरमितिनदोषः अथकल्पवीजोद्धारः आगमालंकरणे· कल्पवीजंचसंवर्तंप्रलयंस्मय
वीजकं क्षामिकंक्षरकंसोहंनथाकल्पांतवीजकं धुवीज्यान्येवमष्टौचकृत्रिमाण्यपराणिच ५५ अथशतघ्नीवीजोद्धारः
उक्तंचागमलहर्यां· शतघ्नीशालिकाश्यामाशाङ्कुलाशुष्कलातथा ५६ घ्रींवीजानितुपंचैवकृत्रिमाण्यपराणिच प्रकाशं
अंक्लींवींरंधुंघ्रींहृींवृंडुकभैरवायनमः स्वाहा इतिमूलं अथमृत्युंजयमंत्रः आगमलर्यां त्र्यसंहृतंशक्तिशोभेपिशकामांत
स्मांहृंधालुयद्दोनथैवतस्माच्छक्तिः खंशरंहृज्जत्रासोमंत्रोद्धारोदेविमृत्युंजयस्य ५६ प्रकाशम् ॐजुंसः हंसः मांमालयघर
सोहंसःजुंॐइतिमूलम्· अथसुग्रीवमंत्रोद्धारः उक्तंचागमशिरोमणौ नारंमायावाग्भवंमन्मथंचशक्तिमेघ्येनामस्यन्त्वा
नथांतकालीपद्मोकूर्चेपद्मोसमस्तापद्मोनीरमेषसुग्रीवमंत्रोप्रकाशंः ॐह्रींऐंक्लींसौः सुग्रीवदेवायक्रोंठः क्रूंठः ह्रीं ठः
स्वाहाइतिमूलम् मयाख्यानाःसुरेशानिसप्तैनेदेविवालकाः कलौसाधितमंत्राणांसाधकानांवरप्रदाः ५८ दक्षिणामूर्तिः १०
शृणुध्वमृषयःसर्वेयुष्माकमस्तियद्धृदिब्रवीमिभवतांप्रीत्याआज्ञापयितुमर्हथ ५९ इतिश्रीदक्षिणामूर्तिमुनिविरचिते

उद्धारकोशे तंत्रे सप्तविद्यास्तत्कुमारमंत्रोद्धारकोशाख्यानेनाम तृतीयः कल्पः समाप्तम् ३ मुनय ऊचुः ब्रह्मर्षे सर्व
तत्वज्ञ शास्त्राम्भोनिधिपारग नवग्रहाणामस्माकं मनूंस्त्वं वक्तुमर्हसि १ ईश्वर उवाच॰ तस्मिन्काले महर्षीणां यदुक्तं धातृ
सूनुना नवग्रहाणां मंत्राश्चतुर्विंहूपरमेश्वरि २ एते पंच महेशानि पंचैषां वारणे देवताः भौमार्क्किराहवश्चैव त्रय एते मुनी
श्वराः ३ देवस्य खंडपाशौ लोचनत्रयदेवताः केतुश्च परमेशानि भूमेर्देवः प्रकीर्तितः ४ एते नवग्रहाः प्रोक्ताः शंभुना
रुद्रयामले अथादौ पंचग्रहे मंत्रोद्धारः तत्रादावादित्यमंत्रः विश्वनाथसारोद्धारे प्रणवं चावरं लक्ष्मीर्व्योमवीजं तथैव
च ६ वीजं तुर्यं शिरोऽन्ते यं ततः पल्लवमुद्धरेत् ग्रहाधिराजापतये आदित्याय तथैव च ७ अंतं पयस्तु विज्ञेयं मनुर्द्वादशाक्ष
रः स्मृतः अथापरमंत्रोद्धारः स्वतंत्रे॰ अंबरं वस्त्रवीजं च मूलं च शक्तिनिर्व्यूहम् ८ हरिं तं हरिणीवीजं हरिद्रावीजमे
वच ह्रौं वीजानि षट्दे विकृत्रिमाण्यपराणि च ९ अंबरवीजो ह्रौं आं ह्रीं प्रकाशम्॰ ॐ ह्रौं श्रीं आं ग्रहाधिराजाय आ
दित्याय स्वाहा इति मूले॰ अथ बुधमंत्रः स्वतंत्रे॰ प्रणवं च तथा स्कंदं रसज्ञा च षडाननः १० मध्ये ग्रहनाथाय बुधायां
तेचरद्वयं बुधस्य ग्रहनाथस्य मनुश्चतुर्दशाक्षरः ११ अथ षडाननवीजोद्धारः कुब्जिकासर्वस्वे॰ षडाननः शर
जन्मा स्कंदः कुमारवीजकम् १२ शंभवः शालिगी वीजं तथा षण्मुखवीजकं ङ॰ वीजानि च सप्तैवं कृत्रिमाण्य

पराणि च १३ प्रकाशं॰ ॐ ह्रां क्रीं डं ग्रहनाथाय बुधाय स्वाहा अथ शुक्रमंत्रः आगमशिरोमणौ॰ प्रणवं मूर्द्धवीजं
च स्तनवीजं समन्वितं १४ शिववीजं ततो मध्ये ग्रहेश्वराय वै ततः शुक्राय नमेश्वरी चैव बालश्चतुर्दशाक्षरः १५ प्रका
शं ॐ ऐं जं गीं ग्रहेश्वराय शुक्राय नमः अथ बृहस्पतिमंत्रः त्रिपुरातिलके॰ अस्त्रं माया पि सौभाग्यो सुरेशि प्रोच्चरेत्ततः
१६ तरंगदेशे संयोज्य चार्वंगो हिंगुवीजकं ऊर्द्धं च षट् शिरोऽज्ञयं ततः पल्लवमुद्धरेत् १७ ततो ग्रहाधिपतये बृहस्पत
य एव च पुनो वारिवहश्चैव ५ लहृीभरो गलरवभरस्थ स्थूणं मेवभरुश्रींक्लीं वनं शिवे सौभाग्येति दोषः दीक्षणं मू
र्त्तिः तस्याधिगत्य मुनय स्वयं यस्स नधी भवेत् क्लरुक्मिणीक्ल सौभाग्याधो भवेन्नरं महत् १९ सुन्दरीसर्वस्वे॰ प्रणवं
सकलो चैव देवेशि रुक्मिणी तथा वारिवाह इति दोषः २० वामकेश्वरे॰ प्रणवं च परां लक्ष्मीं वीचिवैश्यथ योजयेत्
चंद्रं मंठं तथा पश्चाद्ग्रहाधिपतये ततः ततो बृहस्पतये पितृतो जीमूतवीजकं २१ पद्मं लक्ष्मीर्नीरजं च वासना पंकजं
तथा अंते नीरं समाख्यातं पंचविंशाक्षरो मनुः २२ प्रकाशं ॐ ह्रीं श्रीं ह्लीं ऐं ग्लौं ग्रहाधिपतये बृहस्पतये वीं ठः श्रीं ठः
ऐं ठः स्वाहाः अथ चंद्रमंत्रः कालीपटले॰ अस्त्रं च हरिणाक्षी च चक्रं नीवीजे समन्वितं २४ हरेति शब्द संयोज्य शून्या
नुस्वार संयुतं नाम्यवीजं ततो मध्ये चंद्राय नमेश्वरी स्मृता २५ अथ नाम्यवीजोद्धारः भैरवतंत्रे॰ नाम्यवीजं च नर १९

वी·को· नंतांडवंनूतवीजकं २६ चंवीजानिचचत्वारिकृत्रिमाण्यपराणिच प्रकाशं· ॐश्रींक्रींचंचंद्रायनमः एतेनैवपंचवा
११ णानांग्रहाःपंचप्रकीर्तिताः २७ अथभौममंत्रः शारदातीकायां० चारणांहारिणीवीजंरुक्मिणीशर्वरीपतिः वेधोवीजं
ततोमध्ये ग्रहाधिपतयेनमः भौमायांतेपयःप्रोक्तमनुःपंचदशाक्षरः अथवेधावीजोद्धारः स्वतंत्रे·वेधावीजंविधिर्ब्रह्मा
स्वयंभूवीजमेवच २९ कंवीजान्यपिचत्वारिकृत्रिमाण्यपराणिच प्रकाशं० ऐंह्रौंश्रींभ्रांकंग्रहाधिपतयेभौमायस्वाहा
अथशनैश्चरमंत्रः ३० आगमलहर्यां० तारलज्जांश्रियंचैववीजंत्रिशिरऊर्द्धतः ग्रहचक्रवर्तिनेपिशनैश्चरायवेततः ३१
मदनंवासनाशक्तिरंतेनीरमुदाहृतम् शनैश्चरस्यदेवस्यमनुर्विंशाक्षरःस्मृतः ३२ प्रकाशं० ॐह्रींश्रींग्रहचक्रवर्तिनेशनै
श्चरायक्लींऐंसःस्वाहा अथराहुमंत्रः अस्यामेव प्रणवंरसनायुग्मंतटयुग्मंचगर्जितं ३३ ततोटंकधारिणेयवंराहवेह
व्यवाहनः लज्जालक्ष्मीस्तथाभौमावनमंते प्रकीर्तितं ३४ राहोर्विंशाक्षरोवालोयथाभीष्टफलप्रदः अथगर्जितवी
जोद्धारः स्वतंत्रे० गर्जितंस्वनवीजंचस्तनितंरसितंतथा ३५ ढंवीजानिचचत्वारिकृत्रिमाण्यपराणिच प्रकाशं०ॐक्रौं
क्रौंहूंहूंटंटंकधारिणेराहवेरंह्रींश्रींभैंस्वाहा शंभोर्नेत्रत्रयाणांचदेवताकीर्तितामया ३६ स्वदिनेसाधकोमंत्रान्साधयेद्ग्र एमः
हणेयथवा अथकेतुमंत्रः तंत्रमुक्तावलोप्रणवंसकलाहृष्टिस्ततोपिक्रूरकूपिणे ३७ केतवेपितनःपश्चाच्चंद्रःशंकापय ११

स्तथा केतोरयंमनुः प्रोक्तो देवि पंचदशाक्षरः ३८ दृष्टिवीजोद्धारः मुंडमालातंत्रे: दृष्टिवीजं चकरंकं वर्षोपलस्तु वार्षिकः
क्रूं वीजानि च चत्वारि कृत्रिमाण्यपराणि च ३९ प्रकाशं· ॐ ह्रीं क्रूं क्रूररूपिणे केतवे ऐं सौः स्वाहा इति मूलं एषां नवग्रहाणां
च मनवो भाषिता मया अद्याहं तव देवेशि वर्णानां वच्मि वैमनून् ४० कोशं लोकोपकारार्थं गोप्यं कुरु महेश्वरि येन वि
ज्ञानमात्रेण मांत्रिकः साधको भवेत् ४१ इति श्रीदक्षिणामूर्त्तिमुनिविरचिते उद्धारकोशाख्ये तंत्रे सकलागमसारे पंच
ग्रहविग्रहकेतुमंत्रोद्धारकोशाख्यानविधिर्नाम चतुर्थः पटलः ४ ऋषयः ऊचुः ब्रह्मर्षे ब्रह्मपुत्र त्वं सकलाग
मपारग प्रसन्नोसि महाभाग कृपालुर्भव सांप्रतम् १ श्रुतं शास्त्रमिदं देव विविधं मंत्रनिर्णयं वर्णकोशं च मंत्राणां श्रो
तुमिच्छामि हे विभो २ दक्षिणामूर्त्तिः शृणुध्वमृषयः सर्वे मत्तो यूयं यथाविधि वर्णानां मंत्रकोशं च निरुत्तरपरामृ
तात् ३ ईश्वर उवाच शृणु देवि प्रवक्ष्यामि मंत्रकोशं सविस्तरं मुनीनां सूचितं यच्च दक्षिणामूर्त्तिना पुरा ४ त्रिपुरातिं
लेके० ईश्वर उवाच आत्मा वीजमकारं च सांतं हृद्वीजमेव च मानसं चमनो वीजं पैतामहमिति स्मृतं ५ आभू
न्यरक्षमंतरं व्योम वेश्मवं चेति भाषितं आकारस्यानृतं चान्यदुक्तं भैरवतंत्रके आं इंद्रवीजं तथा जिष्णुमरुत्वान्म
घवा हरिः सेवमिकारवर्णस्य ग्रंथे भैरवतंत्रके ७ इ इति त्रिपुरातिलके उद्धिवीजं तथा मेधा भौवीजं च मतिस्तथा १२

बी॰को॰ ऐंद्रं तथैव विज्ञेयमीकारस्यानृतं परं ८ ई कामिकासर्वस्वे॰ रतिवीजं तथानंदा वामनेत्रं तु वीजकं सौर्यमुकारवा-
१२ स्यकृत्रिमं परमीरितं ९ उ। सुंदरीशिरोमणौ कचवीजं तथा केशा मूर्द्धजं च शिरोरुहं ऐंद्रं वै चान्यदनृतं मूकारस्य म-
हेश्वरि १० ऊ। कालीरहस्ये पाप्मावीजं तथा पापं किल्विषं कल्मषं तथा किंकरीवीजमेवं च मांगलं अनृतं परम्
११ ऋ। विश्वयामले॰ कृपावीजं दयावीजं करुणा कार्षिकं तथा ऋकारस्यानृतमन्यद्भाषितं विश्वयामले १२ ॠ
रुद्रयामले॰ विश्वव्यक्तं जगद्वीजं गौर्वै प्रोक्तं मया शिवे १ मंत्रसागरे॰ गंगावीजं स्वर्धुनी च नाकवापी च स्वर्णदी १३
शोक्तमन्यदसत्यं च लृकारस्य मया स्मृतं १४ ॡ कुलचूडामणौ॰ एकादशी मात्रिका च लतावीजं तथैव च वल्ली
वीजं वाकी च शान्यं कृत्रिमकं परं १५ ए त्रिपुरासर्वस्वे॰ वाग्भवं मूर्द्धवीजं च चारणां चंडिकेश्वरः चंद्रोपि चर्मवसन
वासनापि तथैव च १६ चार्वेश्यपि त्र च मोणं मात्रा द्वादशकी मथ राहुख्यानमपो देवि चैकारस्यानृतं परम् १७
ऐ कुल्लाशिरोमणौ॰ प्रणवं च तथा तारं व्यस्तं नौमापि त्र्यवकः त्रासस्वाख्यमेवं च कैतवं च मया स्मृतं १८ ओ भै-
रवतंत्रे॰ मोक्षवीजं तथा मुक्तिज्ञानं निर्वाणमेव च आगस्त्यं च मयाख्यानमौकारस्य सुरेश्वरि १९ औ सिद्धसारतंत्रे॰ एमः
अंश्रवीजं हृक्षवीजं च पादपं च धरारुहं भूरुहं च मयाख्यानमंकारस्यानृतं परम् २० अं सुंदरीसर्वस्वे॰ नागवीजं भू- १२

धरंचभाग्यवीजंचवारुणं ञः छिन्नारहस्ये॰ वेधोवीजंविधिर्व्रह्मास्वयंभूवीजमेवच २१ क आगमामृतमंजर्यां॰
नभोवीजंपुष्करंचचक्षुर्वीजंचक्रवालकं वैष्ठरश्रवबीजं चखकारस्यानंतपरं २२ ख कुलचूडामणौ॰ शिववीजंच
शंभुश्चशर्वःशंकरएवच गकारस्यानंतंचान्यन्मयाप्रोक्तंनगात्मजे २३ ग रुद्रयामले॰ जिनवीजंषडभिज्ञमार
जिद्वीजमेवच मायासुतोर्कवंधुश्चगौतमंकृत्रिमंपरम् २४ घ कुब्जासर्वस्वे॰ षडाननःशरजन्मास्कंदःकु
मारवीजकं शांभवःशालिगीवीजंकृत्रिमंपरमीरितं २५ ङ भैरवतंत्रे॰ नाट्यवीजंचनंदनंताडवंनर्तनवीजकं
च कामेश्वरे॰ शनिवीजमर्कजंचपंगुवीजंतथैवच २६ कालंचसौरवीजंचसंततिसुंदरवीजकं छ आगमलंकारे
ललनवीजंकुचंचैवमुरोजोहृज्जमेवच २७ ज वामकेश्वरे॰ इच्छावीजंस्पृहाकांक्षालिप्सावीजंचतुष्टयं झ त्रिपु
रासर्वस्वे॰ यमवीजंकालवीजंकृतांतंसमवर्तिनम् २८ कीनाशंमृत्युवीजंचञकारस्यानंतपरं ञ स्वतंत्रे॰ गर्जि
तंस्वनवीजंचसनिस्तरस्तितंतथा २९ ट वामकेश्वरे॰ पद्मःपंकजपाथोजोनीरजंमंवुजंतथा ठ रुद्रयामले॰
सिंहिकासरसीवीजंरेणुकावीजमेवच ३० अंजनीवीजमाख्यातंडकारस्यानंतपरम् ड भैरवतंत्रे वायुवीजमनि
लंचसमीरणंमरुत्तथा ३१ समीरंचाशुगंज्ञेयंवातंश्वसनवीजकम् ढ भैरवतंत्रे॰ वाणवीजंमार्गणंचपत्रिणमाशुगंतथा १३

बी॰को॰ कुब्जासर्वस्वे॰ रात्रिबीजं नमीबीजं तामसीबीजमेव च क्षपा च क्षणदाबीजं नकारस्यानृतं परं ३३ न कुलार्णवेतं॰
१३ बिलबीजं च विवरं सुषिरं नागकेतकम् थ॰ स्वतंत्रे॰ चक्रिबीजं व्यालबीजं सर्पः काकोदरोरगौ ३४ भोगिबीजं भु
जंगं च भुजंगमनीतिस्मृतं द॰ त्रिपुरातिलके॰ पुष्पबीजं प्रसूनं च प्रसूतिः सुप्रजा तथा ३५ ध॰ त्रिपुराशिरोमणौ
क्षारबीजं च लवणं सैंधवं स्करं तथा वाराहं चानृतं ख्यातमपरं सुरवंदिते ३६ न छिन्नाशिरोमणौ॰ मत्स्यं च मीन
बीजं च सफरीबीजमेव च झषबीजं तथा त्रेपं पकारस्यानृतं परं ३७ प शारदापटले॰ कूर्मबीजं च कमठं कर्क
टं पिकुलीरकम् फ कालीसर्बस्वे॰ उर्मिर्वीचिस्तथा देवि तरंगस्त्रिनयं तथा ३८ ब मुंडमालातंत्रे॰ भद्रिका भा
स्वती भीमा भकारस्यानृतं परम् भ आगमामृतमंजर्यां॰ दुलिबीजं शिलीबीजं मंडूकं दर्दुरं तथा भेकीबीजं म
ख्यातं मकारस्यानृतं परम् ४० म॰ स्वतंत्रे॰ वायुबीजं तथा वाग्मी वाचलं वैश्यबीजकं वीरबीजं तथा वापीयकारस्या
नृतं परम्॰ य श्यामातंत्रे॰ अग्निरेफश्च वन्हिश्च हुतभुग्हव्यवाहनः र स्वतंत्रे॰ वानबीजं तथा ध्वांतं मोहं तिमिरमे
व च ४१ ल वामकेश्वरे॰ अभ्रबीजं च जीमूतं चाउभ्रं त्ववलं घनं व भैरवतंत्रे॰ कल्याणं चैव शर्मापि शं भुभं च च एम
तुह्यं ४२ श रुद्रयामले॰ चंपाबीजं तडिद्बीजं विद्युच्छतह्रदा तथा ह्रादिनीबीजमेव च षकारस्यानृतं परम् ४३ १३

ष शक्तिः शमोपि विज्ञेयेशरच्छके तथैव च सकारस्य मया प्रोक्तं ग्रंथे छिन्नाशिरोमणौ ४४ सिद्धसारस्वते छविर्बीजं
कांतिबीजं शोभापि सुषमा तथा आकाशं चामृतं देवि हकारस्यापरं प्रिये ४५ ह कुलचूडामणौ देवी बीजं निर्जरश्च
त्रिदिशस्त्रिदिवेशकं सुरबीजं च गीर्वाणं लेखमपर बीजकं क्ष वर्णानां देवदेवेशि कोशमेतत्सुगोपितं दक्षिणामूर्तिना
तेषां भक्त्यादिव्य प्रकाशितम् ४७ इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारकोशे तंत्रे वर्णकोशाख्यानं नाम पंचमः क
ल्पः ५ ईश्वर उवाच त्र्यक्षराणां पृथक् नाम क्रों प्रीं श्रीं ह्रीं ह्सौः तथा वर्णकोशस्य च पृथक् सत्यं सत्यं वरानने १ अद्य
वक्ष्यामि ते देवि तिस्रो भुवनदेवताः दक्षिणामूर्तिना पूर्वमृषीणां भाषितः स्वयं २ भवानी प्रथमाख्याता द्वितीया बगलामुखी
इन्द्राक्षी पि तृतीया च तिस्रो भुवनदेवताः ३ आसां मंत्राणि वक्ष्यामि शृणु त्वं पर्वतात्मजे यस्य कस्य न वक्तव्यं गोपनीयं
प्रयत्नतः ४ अथ भवानीमंत्रः मुंडमालातंत्रे प्रणवं चैव हृत्पद्मं त्र्यक्षयुग्मपरा पुनः हरिणाक्षी द्वयं कूर्चं हरंठद्वयसंयु
तं ५ प्रकाशः ॐ श्रीं श्रीं ॐ ॐ ह्रीं श्रीं श्रीं हूं फट् स्वाहा अथ बगलामुखीमंत्रः आगमलहर्यां तारं चैव मृहूींज ह्लक्षं १४
रं समुदाहृतं ६ मंत्रं च हृच्छिरो ज्ञेयं ततः पल्लवमुद्धरेत् भगवति बगला च मुखि देवि ततः पुनः ७ तथापि सर्वदुष्टानां
वाचं मुखपदं तथा स्तंभय द्वितया जिह्वां कीलय रुद्धि बुद्धिं तथा ८ विनाशय द्विवारं च मृतिकाबीजकं तथा त्र्यक्षरं

वी॰को॰ तेपयोज्ञेयंहूंपंचाशदक्षरोमनुः ९ अथमृत्तिकावीजोद्धारः भैरवतंत्रे॰ मृद्वीजंमृत्तिकावीजंमृत्स्नावीजंप्रशस्तिका
१४ मृत्स्नानृतंपरंज्ञेयंह्रींवीजस्यसुरेश्वरि १० प्रकाशं॰ ॐ ह्रींभगवतिबगलामुखिदेविसर्वदुष्टानांवाचंमुखंपदंस्तंभय २
जिह्वांकीलयरबुद्धिंविनाशयरह्रीं ॐ स्वाहा अथइन्द्राक्षीमंत्रः रुद्रयामले॰ अक्षंकंतोहूयंदेविकूर्चयुग्मंततोवक्त्र ११
पण्यवीजंपरांपद्मांचर्माणांचततोभिधम् १२ इन्द्राक्षिवज्रहस्तेचलक्ष्मींलज्जांचपुष्करं तोरयुग्मंहूंरसनेत्रास्तःचं
द्रोहरंवनं इन्द्राक्ष्याऽष्टविंशार्णोमनुःप्रोक्तःसुरेश्वरि १४ अथपण्यवीजोद्धारः शारदापटले॰ पण्यवीजंसानुवीजंशि
खरंपुष्करंतथा म्लौंवीजानिमयैतानिस्मृतानिहृत्तिमपरं १५ प्रकाशं ॐ क्रौं क्रौं हूं हूं म्लौं ह्रीं श्रीं ऐं इन्द्राक्षिवज्रहस्तेसीं
ह्रीं म्लौं हूं हूं क्रौं क्रौं ॐ ऐं फट्स्वाहा इतिमूलं नित्यएनामयाख्यातावामाभुवनदेवताः दक्षिणामूर्तिरूपेणसंसारेपिप्रका
शिताः १७ अथहिदेवदेवेशिखेचर्यावच्मितेमनुम् यमासाद्यलभेद्योगीखेचरींसिद्धिदाकलौ १८ विष्णुयामले॰ गीर्वा
णादशमंबर्णंचोद्धरेत्प्रतिलोमतः ततोवीजंततोदद्यान्मायावीजंततःस्मृतं १९ ततोदद्यात्क्षुरद्वीजंकूर्चोयंपरिकीर्तितः
मंत्रंतुर्यंशिरोज्ञेयंयोगोरद्यात्ततोभिधम् २० खेचर्येचततोदद्यादंतेचोप्रमकमेवच प्रकाशं॰ म्लींखेचर्यैनमःइतिमूलं रमः
अथवक्ष्यामिदेवेशिध्यानानागमनिश्चितान् क्रमाद्यानसाधकःशीघ्रंजीवन्मुक्तोभविष्यति २१ इतिश्रीदक्षिणामूर्त्ति १४

मुनिविरचिते उद्धारकोशे नेत्रे तिस्रदेवी खेचरीमंत्रोद्धारकोशाख्यानं नाम षष्ठः कल्पः ६ दक्षिणामूर्तिः मुनीश्वराः
प्रवक्ष्यामि ध्यानानागमनिश्चितान् वामकेश्वरतंत्रोक्तं त्रिपुरायायथाब्रुवे १ वामकेश्वरे दिव्यांबरांकितत
नुमिह रम्यनिचंद्रनेत्रां सुधांशुमुकुटां हिमसन्निभां भासिंहासनां परशुखड्गधरां भुजाभ्यां ब्रह्मेन्द्रविष्णुनमितां १५
त्रिपुरां भजेहम् २ रुद्रयामले· लक्ष्मीपद्मासनगतकटिं सूर्यशीतांशुनेत्रां सुचन्द्रास्तत्करचयरुचिं पद्मशं
खालिपाणिं नानामुक्तामणिसुशकलाभूषितांगांहि वाहुं नित्यं लोकत्रिनयनफलदां नौम्यहं भक्तिपूर्वं ३
मंत्रमुक्तावलौ· वाणीपूर्णनिशाकरोज्ज्वलमुखी कर्पूरकुंदप्रभां चंद्रार्द्धांकितमस्तका निजकरैः संबिभ्रती
मादरात् वर्णाभक्षगुणं सुधाघकलशं विद्यां च तुंगस्तनी दिव्यैराभरणैर्विभूषिततनुः सिंहाधिरूढा भजे ४
भैरवतंत्रे० देवीं पन्नगभूषितां हिमरुचिं शीतांशुशंखप्रभां मुक्तारत्नपरीतकंठवलयां रक्तां वरानबिभ्रतीं
मूलाज्ञासिगदाधरां सुरगणैर्वैकुंठमुख्यैः स्तुतां नित्यं लोकत्रये करक्षणपरां तारां त्रिनेत्रां भजे ५ रुद्रयाम
उद्यद्दिनेशद्युतिमिन्दुकिरीटां तुंगकुचां नयनत्रययुक्तां स्मेरमुखीं वरदांकुशपाशाभीजकरां प्रभजे भुवने
शीम् ६ कुब्जिकासर्वस्वे· चंद्रार्धांकितशेखरां त्रिनयनां कोटीन्दुसूर्यप्रभां नानारत्नसहस्रवद्धासनां

वी॰को॰ प्रेतासनेसंस्थितांम् शंखंतोमरपट्टिशाब्जयुगलांदोर्भिर्वहंतीमुदाध्यायेहंहृदयेसदाभगवतींमातंगिनीं
हारिणीं ७ आगमामृतमंजर्यां॰ श्रीशंखचक्रमुशलांबुजयुग्महस्तानागेंद्रहारवलयांकितकंठमाला
१५ सिंदूरकुंकुमसहस्रमरीचिदीप्तिं श्रीशारिकांत्रिनयनांहृदयेस्मरामि ८ वामकेश्वरे॰ शोणांशुचालार्क
कृशानुनेत्रांचतुर्भुजांमेणत्वगासनस्थां शंखाब्जशूलासिधरांमहेशीं राज्ञींभजेहंतुहिनाद्रिरूपाम् ९ आ
गमोद्योते॰ उद्यच्छीतांशुरश्मिद्युतिचयसदृशींफुल्लपद्मोपविष्टां वीणानागेंद्रशंखायुधपरशुधरांदोर्भि
रीड्यैश्चतुर्भिः मुक्ताहारांशुनानामणियुतहृदयांसिंधुपात्रंवहंतीं वंदेश्रीडाभवानींप्रहसितवदनांसाध
केष्टप्रदात्रीं १० ज्वालाशिरोमणौ॰ ज्वालापरीतास्यसरोरुहाना सरोजशंखासिगदाधरांच सिंहासने॰
स्थापितपादयुग्मांज्वालामुखींसद्हृदयेस्मरामि ११ वामकेश्वरे॰ मुंडंविश्वस्यकर्तुः करकमलतलेधा
रयंतीहसंती नाहंतृष्णावदंतीसकलजनचयंभक्षयंतीसदेव श्यामांविष्णुगिरीशौरिपुकुलमथनंदोर्भि
रीड्यैर्दधानासिं ध्यायेहंभद्रकालींनवजलदनिभांप्रेतमध्यासनस्थाम् १२ आगमामृते॰ नानारत्नातिरूढंच राम
न्द्रशकलांमौलौजटाभिर्घने पाशांभोजधरांहिमांशुधवलांदोर्भ्यांप्रसन्नांशिवाम् सूर्येंद्वग्निविलोचनांशितं १५

बी॰को॰ जांधृतासिम् पीतांवरांविष्णुमहेशसेव्यांकामेश्वरीतांहृदयेस्मरामि २० भैरवतंत्रे॰ गौरांगींधृतपंकजांत्रिनय
१६ नांश्वेतांवरांसिंहगां चंद्रोद्भासितशेषरांस्मितमुखींदोर्भ्यांवहंतींगदां विष्विद्राम्बुजयोन्विकामत्रिदशैःसंपू
जितांघ्रिद्वयीं गौरीमानसपंकजेभगवतींभक्तेष्टदांतांभजे २१ भैरवतंत्रे॰ चन्द्रार्द्धमौलिंद्विभुजांत्रिनेत्रांभूलाशी
मालेसततंवहंतीं एणासनस्थांभुजगोपवीतांतानामन्नपूर्णांहृदयेस्मरामि २२ आगमामृतमंजरीतंत्रे त्रिशूला
सिधदोर्भ्यांरक्ताभांवन्हिरूपिणीं अर्चीसिंहासनगतांकुलवागीश्वरींभजे २३ आगमार्णववर्षीयूषे॰ द्विचतुर्दशभ
णभूषितांगंशशिसूर्याग्निविलोचनंसुरेशं अहिभूषितकंठमजस्रंत्रभ्रमयंतंहृदयेगणेशं २४ आगमोद्योते॰
हिमाद्रिस्थितंद्विभुजंभुजंगपरेतगात्रंशिषिविष्टिरस्थं नगेंद्रकन्याप्रियपुत्रमाद्यंहृदिस्मरेभीष्टप्रदंकुमारं २५
उड्डामरतंत्रे सहस्रभुजमंडलीजिततमोचरेशाधिपं हिमांशसदृशाननंधृतसहस्रतूणीकरम् सितांवरध
रंसदातुरगराजमध्यस्थितंस्मरामिभुवनाधिपंहृदितुकार्तवीर्यार्जुनम् २६ कुब्जासर्वस्वे चंद्रोद्भासितमूर्द्धज
सुरपतिंपीयूषपात्रंवहन् हस्ताब्जेनसुधांशुकोटिविमलंहास्यास्यपंकेरुहं सूर्याग्नींदुविलोचनंकरतलैःपाशाक्ष रामः
सूत्रांकुशां भोजानंविभ्रतमक्षयंपशुपतिंमृत्युंजयंभावये २७ कुलचूडामणौ॰ बालषोडशहायिनंकपिपतिंवज्रि १६

मुखींप्रेतासनेसंस्थितां ब्रह्माद्यैःसुरसंचयैःप्रणमितांदेवींभजेहंतरीम् १२ त्रिपुराशिरोमणौ· एणांकांशुपरेतभाल
फलकांवालार्ककोटिप्रभांज्वालावहुमहार्घरत्ननिचयांकंदर्पदर्पोज्ज्वलांशूलास्यंकुशपासवेणुमुशलांभोजा
भयान्विभ्रतीं भक्तेभ्यःछिन्नमस्तिकांभगवतींध्यायेहृदब्जेसदा १३ कालीरहस्ये· ब्रह्माविष्णुशिवास्थिमुंडरस
नांतांवृलस्काधरां वर्षाभेघनिभांत्रिशूलमुशलेपद्मासिपाशांकुशान् शंखासाह्यियुगानधृतांदशभुजांप्रेतासने
संस्थितां देवींदक्षिणकालिकांभगवतीरक्तांवरांनास्मरे १४ श्यामातंत्रे त्रैलोक्यपूजितपदांवुरुहहृदयोनाक्ष
क्ष्मांवुभृत्सहशरूपधरांत्रिनेत्रां शूलासिशंखमहतीःस्वभुजैर्वहंतीं श्यामांस्मरेशववशरीरकृतासनस्थां १५
वामकेश्वरे· शूलाब्जपाशांकुशहस्तपद्मांचतुर्भुजांधूम्रनिभांत्रिनेत्रां सिंहासनस्थांधृतपीनवस्त्रांध्यायेमहेशीं
हृदिकालरात्रीं १६ कुलार्णवे· इंद्वग्निसूर्यनयनांपाशांकुशधरांशिवाम् द्विभुजांसिंहमध्यस्थांभजेहंवज्रयो
गिनीं १७ कुलचूडामणौ· चंद्रार्द्धचूडांविमलांभुजाभ्यांशूलांकुशेश्यामसुखींवहंतीं सूर्याग्निचंद्रीकृतदृष्टिपातां
ध्यायेहृदब्जेसततंवसाहीं १८ शारदापटले· षड्भुजांत्रिनयनांस्मितानना शांडिल्येननमितांद्विपंकजा पर्वतस्थि
तवनीधृतशूलांशारदांभगवतींहृदिध्याये ११॥ त्रिपुरासर्वस्वे· त्रिलोचनांसूर्यसहस्रशोभांसिंहासनस्थांद्विभु

वी॰ को॰ वामे कपूरे शीतांशुमित्रांतकमीड्यरूपं घोरं चैव वैडूर्यनिभं द्विबाहुं त्रैलोक्यरक्षापरमिष्टदं नराहं ग्रहेंद्रं हृदये भजेहं ३८
१७ आगमोद्योते॰ लांगूलयुक्तं भयदं जनानां कृष्णाम्बराभं संनिभमेकवीरं कृष्णाम्बरेशं क्तित्रिशूलहस्तं केतुं भजे मानसपं
कजे हं ३९ कुलचूडामणौ॰ आरिं शंखकृपाणखेटवाणान्सधनुः शूलकतर्जनीं दधानां भयदां महिषोत्तमांगसंस्थां
नवदूर्वासदृशीं भजे भवानीं ४० आगमामृतमंजर्यां॰ नानारत्नोनवद्धं मध्यरसनापीतांवरां भाग्यदां वर्मीं श्यामशशांक
रम्यनयनासिंहासनस्थां परम् सद्गांगेयनिभां महार्घमणिभिर्युक्तासिनां गीं सदा देवेशीं वगलामुखीं हृदि भजे भक्तेष्टदां
भक्तिदां ४१ रुद्रयामले॰ मालास्वक्कशपद्मयुग्मकधरां सहस्रनेत्रांकितां मत्तैरावणपृष्ठगां शशिमुखीं त्रैलोक्यरक्षाप
रां दोर्भिर्गीनरतां सरोजसदृशीं ब्रह्मादिदेवैः स्तुतां मिन्द्राक्षीं जनमातरं हृदि भजे कारुण्यचिद्रूपिणीं ४२ भैरवतंत्रे॰
विनिद्रकमलोल्लसन्मुनिरचितांघ्रिद्वयी सितासितकराननासितकरोज्वलच्छेखरा रवीन्दुशिखिलोचनाभय
पुस्तकौ विभ्रतीस्मरामि हृदि खेचरीं भुवनमातरं सिद्धिदां ४३ ईश्वर उवाच एतासां देवदेवेशि मंत्रं ध्यानं च यं स्मृतम्
यस्य कस्य न दातव्यं तंत्रमुद्धारकोशकं ४४ ऋषय ऊचुः धन्यः स यस्य पुत्रस्त्वं सकलागमपारगः भजे राम॰
त्स्वाश्रमं गंतुमाज्ञापयितुमर्हसि ४५ दक्षिणामूर्तिः गच्छध्वं मुनयः सर्वे क्षमध्वं कृपया मम इत्यु १७

प्रभाभासुरंदोर्भिर्धृत्तगदाधनुःशरच्चयान्संविभ्रन्तंसादरं वंदेदेवस्वरूपिणंरघुपतिंचाराधयंतंमुदाध्यायेहंभग
वंतमर्कनयनंसुग्रीवदेवंहृदि २८ कुलार्णवे·रामेष्टमित्रंजगदेकवीरंप्लवंगराजेंद्रकृतप्रणामंसुमेरुशृंगाग्रगमप्यचिं
त्यमाद्यंहृदिस्मरेहंहनुमंतमीड्यं २९ भैरवतंत्रे·कपालहस्तंभुजगोपवीतंकृष्णच्छविंदंडधरंत्रिनेत्रंअचिंत्यमाद्यंम
धुपानसक्तंहृदिस्मरेद्भैरवमिष्टदंतं ३०·त्रिपुरासर्वस्वे·प्रत्यक्षदेवंविषदंसहस्रमरीचिभिःशोभितभूमिदेशं सप्ताश्वगंसद्
जहस्तमाद्यंदेवंभजेहंमिहिरंहृदब्जे ३१ भैरवतंत्रे·सोमात्मजंहंसगतंद्विबाहुंशंखेन्दुरूपामसिपाशहस्तंदयानिधिंभू
षणभूषितांगंबुधंस्मरेमानसपंकजेहं ३२ कुब्जासर्वस्वे·संतप्तकांचननिभंद्विभुजंदयालुं पीतांबरंधृतसरोरुहद्वंद
मूलं कौचासनमसुरसेवितपादपद्मंगुरुं स्मरेत्त्रिनयनंहृदयाम्बुजेहम् ३३ भैरवतंत्रे·तेजोमयंशक्तित्रिशूलहस्तंसु
रेंद्रसंसेवितपादपद्मं मेधानिधिंमत्स्यगतंद्विबाहुंगुरुंस्मरेमानसपंकजेहं ३४ आगमोद्योते·शंखप्रभंवेणुप्रियंश
शांकंद्विशानमौलिस्थितमीड्यरूपंतमोपतिंचामृतसिक्तगात्रंध्यायेहृदब्जेशशिनंग्रहेन्द्रं ३५ आगमामृतमंजर्यां·
प्रतप्तगांगेयनिभंग्रहेशंसिंहासनस्थंकमलासिहस्तं सुरासुरैःपूजितपादपद्मंभौमंदयालुंहृदयेस्मरामि ३६ आग
मामृते·नीलांजनाभंमिहिरेष्टपुत्रंग्रहेश्वरंपाशभुजंगपाणिं सुरासुराणांभयदंद्विबाहुंस्मरेशनिंमानसपंकजेहं ३७

१८

ज्ञात्वास्वश्रमंजप्त्वासम्मुनयोमंत्रतोषिताः ४६ ईश्वरउवाच दक्षिणामूर्तिनानेनहस्तानत्रानुस
तोरमान् ज्ञानमुद्धारकोशाख्यतन्त्रंतंत्रैकसागरं ४७ गोप्यगुह्यमहादेविमंत्रकोशसम
न्वितं तवप्रीत्यामयाख्यातंगोपनीयंस्वयोनिवत् ४८ देव्युवाच कृतार्थास्मिभवतानेनतंत्रे
णाहंसुरेश्वर इत्युक्त्वासहसाकुंजकैलासादेःप्रजग्मतुः उभौतावंबिकादुर्गादेवीदेव
श्चशंकरः ४९ इतिश्रीदक्षिणामूर्तिमुनिविरचितेउद्धारकोशतन्त्रेदशविद्यादिमं
त्रसागरेसर्वदेवीध्याननिर्णयोनामसप्तमःकल्पः ७ इतिसमाप्तोयमुद्धारको
शाख्यःतन्त्रः समाप्तम् सम्पूर्णम् शुभम्भूयात् श्रीसम्वत् १९४१चै.कृ९ राम:

१८

बी॰को
१९

॥ इतिबीजकोषसम्पूर्णम्



श्रीकाशीविश्वनाथपुरीमहल्लेकर्णघंटापरनाथयन्त्रालयमेंयह
पुस्तकबीजोद्धारकोशछापागया श्रीपंडितलोकनाथचतुर्वेदीके
आज्ञानुसारविश्वनाथशुक्लनेमुद्रितकियावाःभयरोपाठककाःअम्मरसिंह

रमः
१९